# mayUreshastotram

# મયૂરેશસ્તોત્રમ્

## Document Information

Text title : mayUreshastotram

File name : mayUreshastotram.itx

Category : ganesha, stotra

Location : doc_ganesha

Author : Traditional

Transliterated by : Rujuta rujuta 5879 at gmail.com

Proofread by : Rujuta rujuta 5879 at gmail.com

Latest update : February 21, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# મયૂરેશસ્તોત્રમ્

બ્રહ્મોવાચ ।
પુરાણપુરુષં દેવં નાનાક્રીડાકરં મુદા ।
માયાવિનં દુર્વિભાગ્યં મયૂરેશં નમામ્યહમ્ ॥ ૧॥

પરાત્પરં ચિદાનન્દં નિર્વિકારં હૃદિસ્થિતમ્ ।
ગુણાતીતં ગુણમયં મયૂરેશં નમામ્યહમ્ ॥ ૨॥

સૃજન્તં પાલયન્તં ચ સંહરન્તં નિજેચ્છયા ।
સર્વવિઘ્નહરં દેવં મયૂરેશં નમામ્યહમ્ ॥ ૩॥

નાનાદૈત્યનિહન્તારં નાનારૂપાણિ બિભ્રતમ્ ।
નાનાયુધધરં ભક્ત્યા મયૂરેશં નમામ્યહમ્ ॥ ૪॥

ઇન્દ્રાદિદેવતાવૃન્દૈરભિષ્ટતમહર્નિશમ્ ।
સદસદ્વ્યક્તમવ્યક્તં મયૂરેશં નમામ્યહમ્ ॥ ૫॥

સર્વશક્તિમયં દેવં સર્વરૂપધરં વિભુમ્ ।
સર્વવિદ્યાપ્રવક્તારં મયૂરેશં નમામ્યહમ્ ॥ ૬॥

પાર્વતીનન્દનં શમ્ભોરાનન્દપરિવર્ધનમ્ ।
ભક્તાનન્દકરં નિત્યં મયૂરેશં નમામ્યહમ્ ॥ ૭॥

મુનિધ્યેયં મુનિનુતં મુનિકામપ્રપૂરકમ્ ।
સમષ્ટિવ્યષ્ટિરૂપં ત્વાં મયૂરેશં નમામ્યહમ્ ॥ ૮॥

સર્વજ્ઞાનનિહન્તારં સર્વજ્ઞાનકરં શુચિમ્ ।
સત્યજ્ઞાનમયં સત્યં મયૂરેશં નમામ્યહમ્ ॥ ૯॥

અનેકકોટિબ્રહ્માણ્ડનાયકં જગદીશ્વરમ્ ।
અનન્તવિભવં વિષ્ણું મયૂરેશં નમામ્યહમ્ ॥ ૧૦॥

મયૂરેશ ઉવાચ ।

ઇદં બ્રહ્મકરં સ્તોત્રં સર્વપાપપ્રનાશનમ્ ।
કારાગૃહગતાનાં ચ મોચનં દિનસપ્તકાત્ ॥ ૧૧॥

આધિવ્યાધિહરં ચૈવ ભુક્તિમુક્તિપ્રદં શુભમ્ ॥ ૧૨॥

ઇતિ મયૂરેશસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by Rujuta rujuta 5879 at gmail.com

*mayUreshastotram*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*